# B.K. BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

**PRE-BOARD-2 EXAMINATION (2025-26)**
**SANSKRIT (119)**

Class : X
Date :19.12.2025
Admission No.:

**SET -A**

Duration : 3 Hrs
Max. Marks : 80
Roll No.:

---

सामान्यनिर्देशाः -
1. कृपया सम्यकतया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| 'क' खण्डः | अपठितावबोधनम् | 10 अङ्काः |
| 'ख' खण्डः | रचनात्मक कार्यम् | 15 अङ्काः |
| 'ग' खण्डः | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| 'घ' खण्डः | पठितावबोधनम् | 30 अङ्काः |

3. प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्य लेखनीयः।
5. प्रश्नस्य कमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीमानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः 'क'
## अपठितावबोधनम् (10 अङ्काः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (10 अङ्काः)

संस्कृत नाम भारतम्। संस्कृतं नाम भगवद्गीता। संस्कृतं नाम वेदाः रामायणं महाभारतं वा। संस्कृतं हि भारतस्य आत्मा वर्तते। सा भारतस्य आउत्तरात् दक्षिणान्त, आपूर्वस्मात् पश्चिमान्तं च ऐक्यसाधिकाशक्तिः अस्ति। संस्कृतस्य स्मरणात् पञ्चाङ्गं स्मर्यते, तत्रत्याः तिथयः नक्षत्राणि च अपि स्मर्पत, यासाम् आधारेण एव सबैः अपि भारतीयैः पर्वाणि, कुम्भ मेलक, होलिकोत्सवः, दीपावली, दुर्गापूजा, रक्षाबन्धनम् इत्यादीनि आचर्यन्ते। गुरुः गोविन्द सिंहः स्वीयान् श्रेष्ठान् सिक्खपण्डितान् काशीं प्रति प्रेषितवान् आसीत्-संस्कृतम् अधीयताम् इति आदिश्य। ते च योद्धाः, पण्डिताः क्रान्तिकारिणः च 'नामधारिणः' इति विख्याताः आसन्। संस्कृतं भारतात् अपसारितं चेत् तेनेदं नाम एव अस्माकं शरणं स्यात्। आजन्मनः मरणपर्यन्त संस्कृताय अवलम्बनम् अपरिहार्यम् एव अस्माकम्।

(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (1×2=2)
(i) भगवद्गीता कस्यां भाषायां वर्तते ?
(ii) के "नामधारिणः" इति विख्याताः सन्ति?
(iii) संस्कृतस्य स्मरणात् कि स्मर्यते?

(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयमेव) (2×2=4)
(i) गुरुः गोविन्द सिंहः कान् काशी प्रति प्रेषितवान् आसीत्?
(ii) संस्कृत भारतात् अपसारितं चेत् किं भविष्यति ?

(iii) अस्माकं कस्य अवलम्बनम् अपरिहार्यम् एव?

(इ) अस्य गद्यांशस्य उचितं शीर्षकं लिखत| (1×1=1)

(ई) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) (1×3=3)

(i) 'सा भारतस्य ऐक्यसाधिका शक्तिः अत्र विशेषणपदं किम्?

(क) शक्तिः (ख) ऐक्यसाधिका

(ग) सा (घ) भारतस्य

(ii) 'प्रेषितवान् आसीत्' इति क्रियायाः कर्तृपदं किं वर्तते अनुच्छेदे?

(क) रामायणं (ख) आत्मा

(ग) गुरु गोविन्द सिंहः (घ) च

(iii) 'अवलम्बनम् अपरिहार्थम् एव अस्माकम्।' अत्र 'अस्माकम्' पदं केभ्यः प्रयुक्तम्?

(क) भारतीयेभ्यः (ख) वेदेशिकेभ्यः

(ग) सामान्यजनेभ्यः (घ) कोऽपि

(iv) अनुच्छेदे 'विद्वांसः पदस्य कः पर्यायः आगत:?

(क) योद्धाः (ख) पण्डिताः

(ग) वेदा: (घ) पर्वाणि

'ख' खण्ड:

रचनात्मक कार्यम् (15 अङ्का:)

प्रश्न 2. भवती प्रभा अस्ति। मातरं प्रति स्वस्वास्थ्यविषये लिखितम् इवं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्ण लिखतु - (10×½=5)

भवान् सुन्दरः। भवतः अनुजः नैनीताल नगरस्य बुडफोर्ट नामके विद्यालये दशमी-कक्षायां पठति। तस्य समाचारं ज्ञातुं प्रयत्नशीलः मबार। अतः तस्य विद्यालयस्य प्रधानाचार्य प्रति एक पत्र लिखितुम् इच्छति भवान्। तत्य मञ्जूषायाः पचानां सहायतया सम्पूरवतु।

1/360 गोलागोकर्णपुरम्

(i) ------------------

दिनाङ्कः 23-11-20---

सेवायाम्,

श्रीमन्तः प्रधानाचार्याः महोदयाः,

(ii) ----------------------

नैनीतालम् (उत्तराखण्डम्)

सादर नमोनमः।

महाभागाः.

सादरं निवेदन वर्तते यत् मम अनुजः देवर्षिः भवतां विद्यालयस्य (iii) ------------ कक्षायां पठति। विगत मासस्य तस्य किंचिदपि (iv) --------- न आगच्छत्। सः किं करोति ? कथं पठति? तस्य (v) ---------- कथं वर्तते? इत्यादयः। गृहस्य सर्व जनाः एतदर्थं (vi) ----------- सन्ति । मातु: रोदनं निरन्तरम् एव भवति। अतः भवद्भ्यः (vii) ---------- अस्ति यत् इयं पत्र प्राप्य भवान् तस्मै (viii) ----------- दातुं कथयतु। भवतां कृपा भविष्यति यावत् तस्य पत्रं न आगमिष्यति तावद् गृहे (ix) --------- न भविष्यति। कृपया पत्रं दातुं शीघ्रमेव वदन्तु भवन्तः।

(x) -------------

| मञ्जूषा |
|---|
| सधन्यवादम्, कर्णपुरम्, स्वास्थ्यं, वुडफोर्ट विद्यालयः, दशमी, दुःखिताः, स्वसमाचारं, समाचारं, प्रार्थना, शान्तिः |

भवतां कृपाकांक्षी
सुन्दरः

प्रश्न 3. प्रदत्तं चित्रं दृष्ट्वा मंजूषापद सहायतया संस्कृतेन पञ्च वाक्यानि रचयत - (5×1=5)



मंजूषा

उपवनम्, महिला, वृक्षाः, सूर्योदयः, स्वच्छम्, कृषकाः, हरीतिमा, बालकाः, खगाः, उदेति, व्यायामः, पित्रा, बालिका, पुष्पाणि, धावति, वातावरणम्, आकाशे, सन्ति।

अथवा

'योगस्य लाभाः' इति विषयम् अधिकृत्य मञ्जूषापदसाहाय्येन पञ्च संस्कृतवाक्यानि लिखत ।

मञ्जूषा

शरीरम्, स्वस्थः, जनाः, आनन्दम्, प्रातःकाले, मानसिकम्, स्वास्थ्यम्, स्फूर्तिः, भवति, अनुभवन्ति, सर्वे, छात्राः, समयानुसारम्, यथाशक्ति।

प्रश्न 4. रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं प्रपूर्य पुनः लिखत - (5×1=5)

रमेश प्रसादः - अभिवादये महोदय!
प्रधानाचार्यः - नमोनमः, किमागमनप्रयोजनम् ?
रमेश प्रसादः - (1) -------------------------------------- ।
प्रधानाचार्यः - परं सत्रस्य मध्ये प्रवेशः कथं संभवो भविष्यति ?
रमेश प्रसादः - (2) -------------------------------------- ।
प्रधानाचार्यः - अस्तु. पश्यामि अहं किं कर्तुं शक्नोमि? भवान् किं करोति ? छात्रस्य माता वा किं करोति।
रमेश प्रसादः - (3) -------------------------------------- ।
प्रधानाचार्यः - सा शिक्षिता अस्ति न वा?
रमेश प्रसादः - (4) -------------------------------------- ।
प्रधानाचार्यः - इदं तु बहुशोभनम्। शिक्षिता माता
रमेश प्रसादः - (5) -------------------------------------- ।

मञ्जूषा

(क) अहं केन्द्रसर्वकारे वित्तविभागे सहायकाधिकारी अस्मि। मम पत्नी एका गृहिणी अस्ति। सा गृहस्य सर्वाणि कार्याणि सम्पादयति।
(ख) शिशोः आचारव्यवहारेण समं शैक्षिकप्रगतेः अपि अवधानं कर्तुं समर्था भवति।
(ग) अहं भवतां विद्यालये स्वपुत्रस्य प्रवेशार्थम् निवेदनं कर्तुम् आगतोऽस्मि ।
(घ) अहं स्थानान्तरितो भूत्वा अत्रागतोऽस्मि, अतएव सत्रस्य मध्ये प्रवेशार्थं प्रार्थये।
(ङ) आम् महोदय। सा स्नातकपरीक्षोत्तीर्णा अस्ति।

अथवा

मञ्जूषापदसाहाय्येन कथाया: रिक्तस्थानानी पूरयित्वा कथां पुनः लिखत - (10×½=5)

एकदा अहम् सपरिवारं हिमाचल प्रदेशस्य (i) ---------- अगच्छम्। तत्र मम प्रथमं विश्रामस्थलं शिमला नगरमासीत् । तस्य (ii) --------- शोभा अवर्णनीय आसीत्। अनुभूतं यत् (iii) ------- स्व सर्वां सुन्दरतां अत्रैव विस्तारितवती । उच्चैः नीचै: स्वलेषु (iv) --------- हाटकं दृष्ट्या वयं सर्वे मन्त्रमुग्धाः अभवाम। तत्पश्चात् वयं चिन्तपूर्णी (v) ----------- गतवन्तः । तत्र मातुः (vi) -------- दर्शनार्थमनेके जनाः आगताः आसन्। श्रूयते यत् तत्र (vii) ----------- जनाः यत् इच्छन्ति तेषां (viii) ----------- अवश्यमेव पूर्णा भवति। अतः अहमपि तत्र विद्यासुखस्वास्थ्यान् प्राप्तुं (ix) ----------- अकरवम्। ततः कसौली ज्वालाजी इत्यादीनि (x) -------- गत्वा स्वगृहं प्रत्यागच्छम्।

मञ्जूषा

स्थानानि, यात्रायाम्, आकर्षकम्, गत्वा, प्रार्थनाम्, तीर्थम्, चिन्तपूर्ण्या:, प्रकृति-देवी, नगरस्य, मनोकामना

'ग' खण्ड:

अनुप्रयुक्तव्याकरणम् (25 अङ्का:)

प्रश्न 5. अधोलिखितवाक्येषु रेखांकितपदानां संधिं विच्छेदं वा कृत्वा लिखत - (4×1=4)

(i) यदि + अपि विभीषणः रावणस्य अनुजः आसीत् तथापि सः सज्जनः आसीत् ।

(ii) शोभनम् ! मम रचनायां सः लेखकष्टीकते ।

(iii) मया शिवः + अर्घ्यः अस्ति ।

(iv) हे गुरो ! मम शम् + काम् निवारयतु ।

अथवा

(i) ग्रामेऽस्मिन् अनेके परिश्रमिणः कृषकाः अवसन् ।

(ii) शीतलजले शिशुस्स्नाति।

(iii) देवः + आगच्छति।

(iv) तत् + श्रुत्वा सः बालकः उच्चैः अहसत्।

प्रश्न 6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा कृत्वा लिखत - (4×1=4)

(i) सा शुभानना मम सखी अस्ति।

(क) शुभानना यस्मात् मा (ख) शुभम् आनयः सः

(ग) मुभा आला कस्मै सा (घ) शुभम् आननं यस्याः सा

(ii) नरः सर्वदा साधुवृत्तिम् समारेत् ।

(क) साधुं वृत्तिम् (ख) साधूनां वृत्तिम्

(ग) साधवे वृत्तिम् (घ) साधवः वृत्तिम्

(iii) सः राजा नीलम् उत्पलम् इव एक चक्षुः समर्पितवान्।

(क) नीलोत्पलम् (ख) नीलमोत्पलम्

(ग) नीलमउत्पलम् (घ) नीलिमानिऽउत्पलानि

(iv) कृष्णः च बलरामः च भ्रातरौ आस्ताम्।

(क) कृष्ण बलरामा: (ख) कृष्ण बलरामः:

(ग) कृष्णबलरामौ (घ) कृष्णबलरामाश्च

प्रश्न 7. रेखाङ्कितपदेषु प्रकृति-प्रत्ययोः संयोजनं विभाजनं वा कृत्वा पुनः लिखत - (4×1=4)

(1) सज्जनानाम् वृतिः उपकारिन् + ङीप् भवति।

(क) उपकारीणि (ख) उपकारिणीनि

(ग) उपकारिणी (घ) उपकारिणन्

(ii) अविवेकिता तु अनर्थाय एव भवति।

(क) अविवेकित + आ (ख) अविवेक +ता

(ग) अविवेक + तल् (घ) अविवेकि + ता

(iii) भारतस्य भूगोल + ठक् स्थितिः विचित्रा अस्ति।

(क) भूगोलफः (ख) भौगोलिकः

(ग) भौगोलिको (घ) भौगोलिकी

(iv) दुखयुक्ता वाणी मनुष्यस्य पशु + त्व प्रकटयति।

(क) पशुता (ख) पशुत्वम्

(ग) पशुक् (घ) पशुताम्

प्रश्न 8. अधोलिखितं संवादं कर्तृ-कर्मवाच्ये परिवर्त्य उत्तरपुस्तिकायां लिखत- (3×1=3)

पिताः - कुत्र अस्ति अद्यतनं समाचारपत्रम् ?

पुत्रः - इदं मम पार्श्वे अस्ति।

पिताः - किं (i) ----------- 'समाचारपत्रं पठ्यते।

पुत्रः - अहं तु केवलं खेल-चित्राणि पश्यामि।

पिताः - त्वया कस्य खेलस्य (ii) ----------- दृश्यन्ते ?

पुत्रः - मया क्रिकेट-क्रीडकानां चित्राणि (iii) ------------- ।

मञ्जूषा - चित्राणि, दृश्यन्ते, त्वया

अथवा

वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत -

(i) पिता विद्याधनं बाल्ये पुत्राय ------------ ।

(ii) ------------ सम्प्रति आपणं गम्यते।

(iii) छात्रै: कविताः ----------।

मञ्जूषा - अस्माभिः, श्रूयन्ते, यच्छति

प्रश्न 9. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पुरयत- (3×1=3)

(i) राहुल: प्रातभ्रमणाय ----------- (6:15) वादने उद्यानं गच्छति।

(ii) मल्लिका ----------- (7:30) वादने प्रातराशं करोति ।

(iii) अनन्या ------------ (5:45) वादने क्रीडति ।

प्रश्न 10. इमं संवादम् उचितैः अव्ययपदैः पूरयत - (4×1=4)

मञ्जूषा - यत्र-तत्र, यथा-तथा, यदि-तर्हि, यथैव-तथैव

(1) -------- लवः ---------- कुशः।

(ii) --------- अहं कृष्णवर्णः --------- त्वं किं गौराङ्गः!

(iii) --------- गुरुः वदति ----------- शिष्यः करोति।

(iv) -------- वृक्षाः ------------ खगाः।

प्रश्न 11. अधोलिखितवाक्येषु रेखांकित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - (3×1=3)

(1) सा शोभना कन्या सन्ति।

(क) आसम् (ख) स्तः (ग) अस्तु (घ) अस्ति

(ii) नीलः गगनं शोभते।

(क) नीलाम् (ख) नीलम् (ग) नीला (घ) नीलस्य

(iii) पिता पुत्राय स्निह्यति ।

(क) पुत्रस्य (ख) पुत्रेण (ग) पुत्रे (घ) पुत्रौ

'घ' खण्डः

पठितावबोधनम् (30 अङ्काः)

प्रश्न 12. अधोलिखितान् पद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी ॥

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) छाया कीदृशी भवति ?

(ii) मधुरभाषिणी वाणी कम् आह्लादयति ?

(iii) का शीतला भवति ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) कीदृशी वाणी पुरुषं प्रह्लादयति ?

(ii) कीदृशं जलं पुरुषं प्रसन्नं करोति ?

(iii) मधुरभाषिणी वाणी किम् करोति ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'जलम्' इत्यर्थे अस्मिन् श्लोके किं पदं प्रयुक्तम् ?

(ii) 'शीतला' इति विशेषणपदस्य विशेष्यपदं किम् ?

अथवा

(i) 'उष्णा' इत्यस्य पदस्य कः विपर्ययः श्लोके आगतः

(ii) 'मधुरभाषिणी वाणी' इति कर्तृपदाय किं क्रियापदं प्रयुक्तम् ?

प्रश्न 13. अधोलिखितान् गद्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- "भो । किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्या क्षार-तिक्तकषाय-कटु-रुक्षफलानि भक्षयिष्यामः । तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ अहं तु वनं गच्छामि।" अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्याम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति । तस्य क्षितौ प्रलुठतः तृणेषु वहिनज्वाला समुत्थिताः । ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन् । तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः ।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) यूथपतिः कुत्र गन्तुम् उद्यतः भवति ?

(ii) कपयः केन उद्धताः आसन् ?

(iii) अश्वाः प्राणात्राणाय कुत्र अधावन् ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) कपयः कान् त्यक्त्वा वनं गन्तुं न इच्छन्ति स्म ?

(ii) मदोद्धताः कपयः यूथपतेः वचनं कीदृशम् अमन्यन्त ?

(iii) यदा मेषः क्षितौ अलुठत् तदा किम् अभवत् ?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) 'साश्रुनयनः' इति कस्य पदस्य विशेषणम् ?

(ii) 'सुपरिणामम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ?

अथवा

(i) 'जानीथ' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'दिने' अस्य पर्यायवाचिपदं गद्यांशात् चिनुत ।

प्रश्न 14. अधोलिखितनाट्यांशान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

(स्थानम् सरस्तीरम् समयः प्रभातवेला तत्र राजहंस हंसी च विहरतः। नेपथ्ये काकध्वनिः)

राजहसः - अये किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशः 'का का' शब्द वातावरणम् आकुलीक्रियते ?

राजहंसी - भर्तः । काकात् अन्य को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति कर्णकटुशब्दैः

काकः - (प्रविश्य सक्रोधम्) आः। किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृश श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे । अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का-का' ध्वनिना सुप्तान् प्रबोधयामि कर्म च विनियोजयामि।

राजहंसः - हूं। किमनेन ? एतत् कार्य तु कुक्कुटोऽपि करोति ।

बकः - प्रविश्य, स्वपक्षी अवधूय) कथं माम् अपि अधिक्षिपसि ? कि ते महत्वम् ? वर्षर्तौ तु मानस पलायसे? अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि । कीदृशी तव मैत्री? आपत्काले सराप्ति त्यक्त्वा दूरं व्रजसि वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम्, अविचल ध्यानमग्नः 'स्थितप्रज्ञ इव तिष्ठामि । दुग्धधवला में पक्षाः। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूर 'राष्ट्रपक्षी' इति मन्यन्ते । अहमेव योग्य

मयूरः - (प्रविश्य साट्टहासम्) सत्यं सत्यम् । अहमेव राष्ट्रपक्षी । को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मौनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम । अवमानितं खलु सर्व पक्षिकुलं त्वया।

काकः - रे सर्पभक्षकः । नर्तनात् अन्यत् किम् अपरं जानासि ?

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (2×½=1)

(i) राजहंस हंसी च कुत्र विहरतः?

(ii) दुग्धधवला मे पक्षाः। इति कस्य उक्ति ?

(iii) आपत्काले सरांसि त्यक्त्वा कः दूरे व्रजति ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) (2×1=2)

(i) काकः सक्रोधं किं उक्तवान् ?

(ii) मयूरः साट्टहासम् किं वदति ?

(iii) काकः कं "रे सर्पभक्षकः।" इति कथयति?

III. निर्देशानुसारम् उत्तरत- (2×1=2)

(i) अस्मिन् नाट्यांशे पति इति शब्दस्य कृते किं पर्यायपदं प्रयुक्तम्?

(ii) किम् उक्तवान् भवती" अत्र भवती इति पदं कस्मै प्रयुक्तम्?

अथवा

(i) को न जानाति तव ध्यानावस्थाम्?" अस्मिन् वाक्ये क्रियापदं?

(ii) अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि ।" अस्मिन् वाक्ये अहम् इति पद कस्मै प्रयुक्तम्?

प्रश्न 15. रेखांकितपदान् आधृत्य प्रश्ननिर्माणं कुरुत – (5×1=5)

(1) विमूढधीः पक्कं फलं परित्यज्य अपक्कं फलं भुङ्क्ते ।
(2) साधूनां चिते वाचि च सरलता भवति ।
(3) जनकेन सुताय शैशवे विद्याधनं दीयते ।
(4) धैर्यवान् लोके परिभवं न प्राप्नोति ।
(5) आत्मकल्याणम् इच्छन् नरः परेषाम् अनिष्टं न कुर्यात्।

प्रश्न 16. अधोलिखितश्लोकस्य अन्वयं समुचितपदैः पूरयत - (4×½=2)

शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः ।
वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम् ।।

अन्वयः - राजर्षे ! अहम् देवेन्द्रः (1) ---------- त्वत् समीपम् (2) --------- अस्मि ।
वरम् (3) ---------- यत् इच्छसि तत् (4) ---------- ।

मञ्जूषा
वृणीष्व, शक्रः, उच्यताम्, उपागतः

अथवा

अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समाः द्वादश पर्जन्यस्तद् राष्ट्र नाभिवर्षति ॥ 4।।

अन्वयः - यत्र (1) ------ अस्त्रम् परम-अस्त्रेण (2) --------, पर्जन्यः (3) ----------- तद् राष्ट्रम् न (1) ------------ ।

मञ्जूषा
वध्यते, द्वादशसमाः, अभिवर्षति, ब्रह्मशिरः

प्रश्न 17. रेखाङ्कितपदेषु प्रसङ्गानुसारम् उचितम् अर्थचयनं कुरुत- (4×1=4)

(क)" चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दढम् ।"
(i) मथनशीलम् (ii) चिन्तनशीलम् (iii) गुणवत्

(ख) "ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते।"
(i) मित्रस्य (ii) पुरुषस्य (iii) शिक्षकस्य

(ग) क्रोधाद् भवति सम्मोहः ।
(i) उद्विग्नता (ii) निर्धनता (iii) व्याकुलता

(घ) अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ।
(i) भीमः (ii) अर्जुन (iii) नकुलः

प्रश्न 18. मञ्जूषायाः सहायतया पाठाधारित कवापूर्ति कुरुत- (8×½=4)

अस्ति (i) -------- नगरे प्रच्छन्नभाग्य-नाम-धेय कश्चित् (ii) --------- । तस्य (iii) -------- एकं मित्रम् आसीत्। उभौ (iv) ---------- ग्रामान्तरं प्रस्थितौ । (v) ---------- प्रभावितः प्रच्छन्नभाग्यः चौरकर्म विहाय सुकर्म कृतवान्। एकदा दुष्टबुद्धिः (vi) ---------- गृहे आगतवान्। सः स्वमित्रं (vii) ---------- इच्छन् भित्तौ सन्धिं प्रकल्प्य तत् मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान्। विचित्रा खलु (viii) --------- । पतितात् कलशात् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान्।

मञ्जूषा
[ दैवगतिः, मारयितुम्, कुमारः, कर्मपूरनाम्नि, दुष्टबुद्धिनाम, चौरार्थ, बालवचसा, प्रच्छन्नभाग्यस्य ]

======================== सफलतायै शुभाशयाः ====================